राष्ट्रियसंस्कृतविश्वविद्यालयग्रन्थमाला - ३५८
ISSN - 2231-0452

# उत्कर्षदीपिका

# Utkarṣadīpikā

(महस्विनी-विशेषाङ्कः)

प्रधानसम्पादकः
आचार्यः गुळ्ळपल्लि श्रीरामकृष्णमूर्त्तिः



सम्पादकाः
आचार्यः कोराड सूर्यनारायणः
आचार्यः सतीशः के.एस्.
डॉ.उदयनहेगडे

राष्ट्रियसंस्कृतविश्वविद्यालयः
(केन्द्रीयविश्वविद्यालयः)
तिरुपतिः - ५१७ ५०७
२०२३

# उत्कर्षदीपिका

(तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयेन समायोजितं उत्कर्षमहोत्सवमुपलक्ष्य प्रकाश्यमानः महस्विन्याः विशेषाङ्कः - २०२३)

ISSN : 2231 - 0452

© राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः - ५१७५०७, आन्ध्रप्रदेशः।

| | | |
|---|---|---|
| प्रकाशकः | : | कुलसचिवः<br>राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः - ५१७५०७, आन्ध्रप्रदेशः।<br>ई-मेल : registrar_nsut@nsktu.org |
| अन्तर्जालपुटम् | : | https://nsktu.ac.in |
| प्रकाशनसमन्वयकः | : | अनुसन्धान-प्रकाशनविभागः,<br>राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः। |
| प्रथमसंस्करणम् | : | २०२३ |
| मुद्रितप्रतयः | : | ३१० |
| पुटसङ्ख्या | : | ३१८ |
| पुस्तकाकारः | : | रायल ओक्टाव |
| मूल्यम् | : | ₹ 690/- |
| मुद्रणम् | : | प्रजाशक्ति प्रिण्टर्स एण्ड पब्लिशर्स प्राइवेट लिमिटेड, तिरुपतिः। |

# उत्कर्षदीपिका

(महस्विनीविशेषाङ्कः – २०२३)

## शोधलेखानुक्रमः


| क्र.स. | विषयः | पुटाङ्कः |
|---|---|---|
| १. | भारतीयज्ञानपरम्परायां निहितानि तत्त्वानि<br>– प्रो.रामसलाहीद्विवेदी | 1 |
| २. | कालिदासीयाः केचनापत्यप्रत्ययान्ताः<br>– प्रो.जयकान्तसिंहशर्मा | 5 |
| ३. | सांख्यदर्शने मोक्षस्यावधारणा<br>– प्रो.सुजातात्रिपाठी | 15 |
| ४. | ईश्वरस्वरूपमीमांसा<br>– प्रो.मारकण्डेयनाथतिवारी | 21 |
| ५. | विविधशास्त्रप्रयुक्तगुणपदार्थनिरूपणम्<br>– डॉ. दयाल सिंह पंवार | 34 |
| ६. | न्यायवैशेषिकशास्त्रे मनस्तत्त्वविचारः<br>– प्रो. बिष्णुपदमहापात्रः | 38 |
| ७. | शिक्षाशास्त्रे नवीनाः विचाराः<br>– आचार्य. के. भरतभूषणः | 46 |
| ८. | वैदिकदर्शनानां सृष्टिप्रक्रिया प्रामाण्यवादस्य सन्दर्भे<br>– प्रो.प्रभाकरप्रसादः | 52 |
| ९. | वैदिकवाङ्मये कालविज्ञानस्य विविधपक्षाः<br>– प्रो. प्रेम कुमार शर्मा | 58 |
| १०. | भारतीयजैनज्ञानपरंपरा<br>– प्रो.अनेकांतकुमारजैनः | 67 |

महस्विन्याः विशेषाङ्कः - उत्कर्षदीपिका
विद्वत्समीक्षिता मूल्याङ्किता च शोधपत्रिका (ISSN: 2231-0452), वर्षम् : २०२३

# वैदिकदर्शनानां सृष्टिप्रक्रिया प्रामाण्यवादस्य सन्दर्भे

प्रो. प्रभाकरप्रसादः*

गोकर्णाख्ये शिवक्षेत्रे धूर्जटेर्नित्यसन्निधौ ।
स्थितमारामविघ्नेशं सिद्धिदं प्रणमाम्यहम् ॥

वेदप्रामाण्याभ्युपगमानभ्युपगमभेदेन द्वेधा विभक्तानि भारतीयदर्शनानीति प्रसिद्धानि। तत्र वेदप्रामाण्यमभ्युपगम्य प्रवृत्तानां न्यायवैशेषिकसाङ्ख्ययोगपूर्व-मीमांसोत्तरमीमांसादर्शनानां मध्येऽपि प्रपञ्चस्य सृष्टिविषये अर्थात् तत्स्वरूपविषये, प्रक्रियाविषये च नैकमत्यं दृश्यत इति विदितमेव। तत्र को हेतुः इति विमर्शे प्रमाणानां प्रामाण्यस्य स्वीकारे यो मतभेदः प्रसिद्धः तस्यापि हेतुत्वमस्तीति तन्मूलकः सृष्टिविवेचने कथं मतभेदः सञ्जातः इति लेखेनानेन प्रतिपादनाय यत्नो विधीयते।

षड्वैदिकदर्शनानां तन्त्रत्रये विभागः प्रसिद्ध एव। न्यायवैशेषिकयोः एकं तन्त्रत्वम्। साङ्ख्ययोगयोः एकं तन्त्रत्वम्। पूर्वोत्तरमीमांसयोरेकं तन्त्रत्वमिति त्रेधा विभागः। न्यायवैशेषिकदर्शनेऽसत्कार्यवादेन प्रवृत्ते। साङ्ख्ययोगदर्शने सत्कार्यवादे प्रवृत्ते। पूर्वोत्तरमीमांसे च वेदवाक्यविमर्शमुखेनैव प्रवृत्ते। तत्र न्यायवैशेषिकदर्शनयोः प्रवृत्तिः उद्देशलक्षणपरीक्षामुखेन भवति। नामसङ्कीर्यनमुद्देशः, आदौ न्यायदर्शने प्रमाणादयः षोडशपदार्थाः सन्तीति तेषां नामानि कथितानि। तदनन्तरं तेषामुद्दिष्टानां लक्षणानि कृतानि, तदनु तेषां परीक्षा कृता विस्तरेण। तत्र प्रथमाध्याये न्यायदर्शने पदार्थानामुद्देशलक्षणे समाप्ते। तदनु चतुर्थिरध्यायैः तेषां परीक्षा विधीयते। अतः इदं परीक्षाप्रधानं शास्त्रम्, प्रमाणानां प्रामाण्यं स्वतः इत्यङ्गीकारे परीक्षाया आवश्यकतैव नास्तीति, प्रमाणानां प्रामाण्यं परतः इत्यत्र स्वीक्रियते। तत्र यावज्ज्ञानग्राहक-सामग्रीग्राह्यत्वं स्वतस्त्वम्, यावज्ज्ञानग्राहकसामग्र्यतिरिक्तग्राह्यत्वं परतस्त्वम्। एतज्ज्ञप्तिगतं स्वतस्त्वम्, परतस्त्वम्। उत्पत्तिगतं स्वतस्त्वञ्च ज्ञानसामग्रीमात्रजन्यत्वम्। ज्ञानासामान्यकारणभिन्नकारणजन्यत्वम् उत्पत्तिगतं परतस्त्वम्। अयमाशयः - प्रामाण्यं

---

* अध्यक्षः, सर्वदर्शनविभागः, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली